# ॥ તુલસીપૂજા ૩ ॥

.. tulasI pUjA 3 ..

sanskritdocuments.org

June 13, 2017

# .. tulasI pUjA 3 ..

## ॥ તુલસીપૂજા ૩ ॥

## Sanskrit Document Information

Text title : tulasIpUjA 3

File name : tulasIpUjA3.itx

Category : pUjA

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Shree Devi Kumar

Proofread by : Shree Devi Kumar

Description-comments : laghupUjA

Acknowledge-Permission: Mahaperiaval Trust

Latest update : June 12, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

June 13, 2017

*sanskritdocuments.org*

# ॥ તુલસીપૂજા ૩ ॥

તુલસી લઘુપૂજા ૧

શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં ધ્યાયેત્ સર્વવિઘ્નોપશાન્તયે ॥

શ્રીપરમેશ્વરપ્રીત્યર્થં તુલસીદેવી પ્રીત્યર્થં
સર્વારિષ્ટશાન્ત્યર્થં સર્વમઙ્ગલપ્રાપ્ત્યર્થં તુલસીપૂજાં કરિષ્યે ॥

(અપ ઉપસ્પૃશ્ય - પૂર્વાઙ્ગપૂજા)

ધ્યાયામિ તુલસીં દેવીં શ્યામાં કમલલોચનામ્ ।
પ્રસન્નાં પદ્મકલ્હાર વરાભય ચતુર્ભુજામ્ ॥

કિરીટ હાર કેયૂર કુણ્ડલાદિવિભૂષિતામ્ ।
ધવલાંશુકસંયુક્તાં પદ્માસન નિષેદુષીમ્ ॥

તુલસીં દેવીં ધ્યાયામિ ॥

અસ્મિન્ તુલસી ક્ષુપે તુલસીં દેવીં આવાહયામિ ।
વિષ્ણુવલ્લભાયૈ નમઃ - આસનં સમર્પયામિ ।
સર્વદેવમયાયૈ નમઃ - પાદ્યં સમર્પયામિ ।
સર્વતીર્થમયાયૈ નમઃ - અર્ઘ્યં સમર્પયામિ ।
દૈત્યાન્તકૃત્પ્રિયાયૈ નમઃ - આચમનીયં સમર્પયામિ ।
સર્વલોકહિતાયૈ નમઃ - સ્નાનં સમર્પયામિ ।
લક્ષ્મી સહોદર્યૈ નમઃ - વસ્ત્રયુગ્મં કઞ્ચુકં ચ સમર્પયામિ ।
મહાદેવ્યૈ નમઃ - ગન્ધં કુઙ્કુમં સમર્પયામિ ।
રમાવાસાયૈ નમઃ - અક્ષતાન્ સમર્પયામિ ।
અભીષ્ટદાયૈ નમઃ - પુષ્પાણિ સમર્પયામિ ।
અર્ચના–
વૃન્દાયૈ નમઃ । વૃન્દાવન્યૈ નમઃ । વિશ્વપૂજિતાયૈ નમઃ ।
વિશ્વપાવન્યૈ નમઃ । પુષ્પ સારાયૈ નમઃ । નન્દિન્યૈ નમઃ । તુલસ્યૈ નમઃ ।
કૃષ્ણજીવન્યૈ નમઃ । (ષોડશશનામભિઃ, અષ્ટોત્તરશનતનામભિઃ
સહ્સ્રનામભિર્વા)
પાપહારિણ્યૈ નમઃ - ધૂપં સમર્પયામિ ।

ભગવત્યૈ નમઃ - દીપં સમર્પયામિ ।
અમૃતસમ્ભૂતાયૈ નનઃ - નૈવેદ્યં સમર્પયામિ ।

જગદ્ધાત્ર્યૈ નમઃ - તામ્બૂલં ફલાનિ ચ સમર્પયામિ ।
સુદક્ષિણાયૈ નમઃ - નીરાજનં સમર્પયામિ ।
પરમેશ્વર્યૈ નમઃ - પુષ્પાઞ્જલિં સમર્પયામિ ।
અભીષ્ટદાયૈ નમઃ - પ્રદક્ષિણનમસ્કારાન્ સમર્પયામિ ।
તુલસીસ્તોત્રાણિ પઠેત્ । (પૃ। ૧૨૮- ૧૪૦)
યાનિ કાનિ ચ પાપાનિ જન્માન્તરકૃતાનિ ચ ।
તાનિ તાનિ વિનશ્યન્તિ પ્રદક્ષિણપદે પદે ।
તુલસી દેવ્યૈ નમઃ - સર્વોપચારાન્ સમર્પયામિ ।
કાયેન વાચા મનસેન્દ્રિયૈર્વા બુદ્ધ્યાત્મના વા પ્રકૃતેઃ સ્વભાવાત્ ।
કરોમિ યદ્યત્સકલં પરસ્મૈ નારાયણાયેતિ સમર્પયામિ ।

॥ ૐ તત્સત્ - બ્રહ્માર્પણમસ્તુ ।

Encoded and proofread by Shree Devi Kumar

.. tulasI pUjA 3 ..
was typeset using XƎLATEX 0.99996
on June 13, 2017

Please send corrections to *sanskrit@cheerful.com*